# संस्कृतवार्ता:

**दिनाङ्क :-13.01.2025**

**प्रात: - 06:55**

**लोहडीपर्व**

उत्तरभारते विशिष्टतया पञ्जाब-हरियाणा-हिमालपद्रेश-दिल्ली-जम्मू-चण्डीगढ राज्येषु सस्योत्सव: लोहडीपर्व हर्षोल्लासेन आचर्यते1 इदं हि पर्व शीतकालस्य दीर्घा: रात्री: समाप्य ग्रीष्मकालस्य दीर्घाणि दिनानि स्वागतीकरोति यतो हि सूर्येण एतस्मिन् समये उत्तरगोलार्द्धं प्रति स्वयात्रां समारभते। अस्मिन् शुभपर्वणि जना: अग्निं परित: लोकनृत्यानि अपि कुर्वन्ति मित्रै: परिवारेण च सह उपहाराणां विनिमयं कुर्वन्ति। इदं पर्व सस्यानां सङ्ग्रहणेन सुखेन च सम्बद्धं वर्तते। शुभावसरे अस्मिन् राष्ट्रपति: द्रौपदीमुर्मु: उपराष्ट्रपति: जगदीप-धनखड: जनेभ्य: शुभकामना: प्रदत्तवन्तौ।

**प्रधानमन्त्री-सोनमर्ग-सुरंग:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य जम्मू-कश्मीर-राज्ये सोनमर्ग -आन्तर्भौम-मार्ग-परियोजनाम् उद्घाटयिष्यति। अयम् आन्तर्भौममार्ग: श्रीनगर-सोनमर्ग-इत्यनयो: मध्ये लेहस्थलस्य गमनामय सर्वतोपलब्धं कस्मिन्नपि ऋतौ सम्पर्कं प्रदास्यति। यात्रावधौ प्रधानमन्त्री निर्माण-श्रमिकान् अपि मिलिष्यति अपि च तेषां कार्याणां प्रशंसामपि करिष्यति।

**विदेशमन्त्री**

विदेशमन्त्री डॉ. एस्. जयशङ्कर: अद्यारभ्य स्पेनदेशस्य द्विदिवसीययात्रायै प्रस्थास्यति1 तस्य इयं प्रथमा स्पेनदेशस्य यात्रा भवेदिति। प्रवासावधौ डॉ. जयशङ्कर: स्वीयेन स्पेनदेशीयेन समकक्षेण मेनुअल-अल्बेरेस-इत्यमुना साकं द्विपक्षीयसम्बन्धानां समग्रपदक्षेपै: सह पारस्परिक-हितानां क्षेत्रीय-वैश्विक-प्रसङ्गेषु चर्चां विधास्यति। असौ स्पेनदेशीय-राजदूतानां नवमं वार्षिक-सम्मेलनमपि सम्बोधयिष्यति तथा च भारतीयसमुदायेन सह सम्वादं करिष्यति।

**महाकुम्भ:**

पञ्चविंशत्यधिक-द्विसहस्रतमवर्षीयं पवित्रं पुण्ययुतञ्च महाकुम्भ-मेलापकम् अद्य पौषपूर्णिमाया: सर्वप्राथम्येन अमृतस्नानेन प्रयागराजे समारभत। गङ्गा-यमुना-सरस्वती-नदीनां त्रिवेणि-सङ्गमस्य विभिन्नेषु घट्टेषु बहव: लक्षसङ्ख्यका: श्रद्धालव: तीर्थयात्रिण: पर्यटका: साधवश्च पवित्रनद्यां स्नानम् आचरन्ति इति।

अयं भव्यः अलौकिकः दिव्यः च  महाकुम्भः फरवरीमासस्य षड्विंशतिदिनाङ्पर्यन्तं महाशिवरात्रिं यावत् प्रचलिष्यति। एतत् आयोजनं सुरक्षितं स्मरणीयं च भवेदिति सुनिश्चेतुं प्रशासनेन सर्वविधोपायाः कृताः। अपरत्र अस्मै महाकुम्भाय सप्तस्तरीया सुरक्षाव्यवस्था कृतास्ति। एतस्मिन् महाकुम्भे पञ्चचत्वारिंशत्कोटिजनाः भक्ताः च उपस्थिताः भविष्यन्ति इति अनुमीयते। तदर्थं भारतीय-रेलवे-विभागेनापि दशसहस्रं यावत् रेलयायानि अपि च त्रिंशत- सङ्ख्यकानि विशिष्टानि रेलयानानि प्रचालयन्ते।

<u>ऋतुसञ्चेतना</u>

ऋतुविज्ञान-विभागेन उक्तं यत् हिमाचल-प्रदेशे राजस्थाने च  शीत-लहर्याः अनुमानं विद्यते। पञ्जाबे राजस्थाने हरियाणायां चण्डीगढे उत्तर- प्रदेशेस्य च कतिपय-पूर्व-भागेषु रात्रौ प्रातः काले च कुज्झटिकायाः सम्भावना वर्तते। हिमाचल-प्रदेशे उत्तराखण्डे पश्चिम-बङ्गालस्य गाङ्गेय-क्षेत्रे च सघन-कुज्झटिकायाः अनुमानम् अपि ऋतुविज्ञान-विभागेन प्रकटितम्। सिक्किमे ओडिशायां नागालैण्डे मणिपुरे मिजोरमे त्रिपुरायां च सघन-कुज्झटिका प्रवर्तयिष्यते।

।।इति वार्ताः।।